॥ श्री ॥

श्रीनारायणभट्टविरचितः

शूर्पणखाप्रलापः ।

(निरनुनासिकप्रबन्धः ।)

आक्रन्दकम्पितसभं पतिता [1]प्रसर्प-
द्रक्तानतिस्फुट[2]विकृत्तकराळ[3]गात्री ।
सम्भ्रान्तयानुगणमध्यगमग्रजं सा
नासाक्षयान्निरनुनासिकमेवमूचे ॥ १ ॥

[4]हा हा ! राक्षसराज ! दुष्परिभवग्रस्तस्य धिक् ते भुजा
विद्युज्जिह्वविपत्तिरेव सुकरा क्षुद्रप्रताप ! त्वया ।
ध्वस्तापत्रप ! पश्य पश्य सकलैश्चक्षुर्भिरेतादृशी
जाता कस्यचिदेव तापसशिशोः शस्त्रात् तवैव स्वसा ॥ २ ॥

अस्यास्तिष्ठतु वा [5]विपादितपतेर्दुर्भ्रातृकाया [6]विपत्
सोदर्यास्तव ये[7] खरप्रभृतयो ये चापि रक्षोभटाः ।
सर्वे तच्छरलीलया [8]बत ! कृता वैवस्वतोपासकाः
[9]स्वस्यास्तिष्ठ [10]तवापि भो जळ ! गळे प्रायोऽस्य हेतिः पतेत् ॥३॥

---

१. ' विसर्प ' क. २. ' विविक्त ' ख. ३. ' गात्रा ' ख.
४. ' ही ही ' ख. ५. ' विपाटित ' ख.
६. ' विपत् ते पिष्टत्रिदशाः क्षपाचरभटास्ते चापि ते सोदराः ' इत्यपि दृश्यते गपाठे ७. ' ते ' ख. ८. ' खलु ' ख.
९. ' स्वस्थो जीव ' इत्यपि गपाठे । १०. ' तवैव ' ख.

श्रोतव्यौ तत्त्वतस्तौ यदि तव कथये सा तयोर्गात्रशोभा
दृष्टा चेत् पुष्पचापादपसरति रतिः पुष्कराक्षादपि श्रीः ।
भूयश्चावेहि ही ही ! करजदळितदैत्येशवक्षाः स शौरि-
र्विश्वप्लोषी स रुद्रोऽप्यतिसुसह इव प्रस्तुते तत्प्रतापे ॥ ४ ॥

द्वौ गोत्रे सप्तसप्तेरपि च दशरथात् ख्यातधृत्रारिसख्या-
ज्जातौ स्फीतप्रभावादथ कुशिकसुतादात्तदिव्यास्त्रजालौ ।
अध्यादौ ताटकासृक्कबळरसवशाद्राक्षसास्वादलुब्धै-
रस्त्रैरेवादधाते क्रतुविहतिभिदस्तौ हि बाल्येऽपि लीलाः ॥ ५ ॥

भूयश्चैतौ विदेहक्षितिपतिपुरवर्याभिगुप्ते पुरारे-
श्चापे दुर्वारतेजस्यपि च भृगुवरे स्पष्टदृष्टप्रभावौ ।
यातौ राज्यादृषिभ्यः किल कृतशपथौ क्वापि घोरेऽद्य कार्ये
गोदावर्याश्च तीरक्षितिषु विहरतस्तापसौ चापभाजौ ॥ ६ ॥

अपि च— अपरा कापि पराद्भुतोद्भूतिरुपश्रोतव्या भवता । तत्र खलु तत्तादृगेतयोर्गात्रश्रीः प्रकाश्येत चेदखिलाँ खल्वबलाजातिः शफरध्वजशरैः शकलीभवेदिति कृपाकुलितचेतसा वेधसा विरचिताटवीगूढवासयोस्तयोरग्रजस्य उदग्रवीर्यदुरासदस्य परिग्रहीभूता, दुर्विषहविषधरपरिगृहीतेव बालपटीरवल्लरी, जगदादितः प्रभृति प्रारब्धाया वधूवर्गसर्गकौशलशिक्षायाः फलभूतेव सरोजभुवः आकल्पभाविबहुतरतरळाक्षी-

१. ' कथये रूपशोभा तयोस्सा ' ग.
२. ' तत्प्रभावे ' ख.
३. ' दपि ' ख.
४ ' सुतादात्तदिव्या ' ग.
५. ' प्रतापौ ' क.
६. ' लापि खल्व ' ग.
७. ' कृपाकलितचेतसा ' क, ' कृपाकुलचेतसा ' ख.
८. ' सेव वेधसा ' ग.
९. ' शौर्यदुरा ' ख. ग, ' शौर्यस्य दुरा ' घ.

सर्गार्थोपचितचारुत्वसारसर्वस्वयोगत इवोपपादिता, दरोद्गतशिरीषप्रसव-केसराग्रदेशस्यापि कठोरताप्रदायिभिः तदटवीपुष्पप्रवाळजालकपेलवत्व-सारैरिवैकत्रोपचितैः सर्वतोविसारिप्रभापूरपरिपोषकृतपरिवेषतया सुजातजातरूप[1]द्रवरूपतोया[2]धारदूरावगाढैरिवोपलक्ष्यैः अवयवैरेकैकैरेव व्याकृष्टसकललोकदृष्टिः, स्वारसिकदिव्यसौरभ[3]योगादविरतधारितपारिजातप्रसवैरिव विश्लथीभावे चाशेषतिरोहितै[4]शरीरपश्चाद्भागैर्गात्रयष्टावपि जलधरैकदेशदृष्टतटिल्लताप्रतीतिकारिभिः कुटिलविततायताकारतया तरळै[5]वीचिविभागलुलितसूर्यसुतावारि[6]पूरप्रतीकाशैः केशपाशैर्दिवापि दर्शितक्षपावतारा, शशिशेखरस्पर्धावता चित्तभुवा स्वा[7]कल्पाय कल्पिते बाल-[8]सितकर [9]इवोल्लसिते फालदेशे विकस्वरकार्तस्वरकेतकीदळे लुलितषट्पदावल्येव [10]तरळकुरळावल्या प्रोल्लसिता, असितदृष्टिप्रभाप्रवाहपरिसरपरिलो[11]लोद्दालकल्लोललेखालीलयोरीषद्वक्रितशक्रोपलशलाकातुलायोग्ययोश्चिल्लीलतयोः प्रकाशितरसभावैर्विलासलास्यैराह्लादितरसिकलोका, श्रोत्रोपशल्यवेल्लिततया श्रवःपूरकुवलयकलिकाप्रक्षेपस्य प्रसृतासितच्छायतया च कज्जलपरिष्कारस्य अवलो[12]कविवशीकृतयुवलोकहृदयतया प्रसवशरशरप्रहारप्रयासस्यापि गतार्थताकारिभिः स्वच्छतरकपोल-[13]च्छायासलिलोच्चलितशफरीवि[14]लासशीफरैः सहजव्रीळाराग्यतिकर-

---

१. ‘ द्रवतोया ’ ख. ग.
२. ‘ धारावगूढै ’ ख.
३. ‘ योगाविरत ’ च.
४. ‘ तपश्चा ’ च.
५. ‘ वीचिविभाग ’ ग.
६. ‘ पूरप्रवाहप्रती ’ ग.
७. ‘ कल्पकाय ’ ख.
८. ‘ शीत ’ ख. च.
९. ‘ इवालसिते ’ ख. ग.
१०. ‘ तरळालकावल्या ’ च.
११. ‘ लबाल ’ च.
१२. ‘ कजवविवशी ’ ख.
१३. ‘ च्छायया सलि ’ ख.
१४. ‘ विकसितशी ’ च.

पारिप्लवैराक्षिप्रचारैः सविधविहारिवातायुपोतकेभ्यो वीक्षाचातुरीरिवो-
पदिशती, श्रुति[1]भूषालुलितदिव्योपलपर्यस्तगभस्तिरेखावपातादालिखि-
[2]तचित्रपत्रलेखाविवोपलक्ष्यौ अरूपीभवद्रतिपतिव्युपेक्षितादर्शनरविर-
चिताविव कपोलदेशौ प्रतिवेलप्रसृत[3]कोळिहसितविलासैरुत्फुल्लदुल्लासावा-
दधती, पीयूषसारसोदरस्य चाधरस्य परिपाटलरुचिप्रचयपरिचयात्
कदाचिदप्य[4]विरतरागग्रहैरिव हृदयरागरूषितोद्यदालापपीयूषपूषितरा-
जिचारुभी रदकोरकैः केसरितास्यसरसीरुहा, अतिपृथुलोच्छ्रितकुच-
व्यपदेशोदयशैलशिखरदेशादीष[5]दुत्पत्यावतस्थुषस्तुषारकरादिवाविगत-
रागोल्लासाद्वक्त्रदेशादति[6]बहळतया विगलता लळितगळपदव्याभिपत्य
परस्पराभिहतावस्थितकुचयुगस्थलप्रतिरोधाद् द्वेधा भवता [7]पौष्पेषवरस-
सुधास्रोतसेव विशदकररुहरुचि[8]र्धारापूरविलसदाकलितकरतलच्छलरक्त-
सरोजश्रीभाजा भुजयुगलश्रिया प्रत्यग्रप्रत्युत्थितहाटकविटपायाः कल्प-
लतायाः अप्यल्पतादात्री, त्रपावशप्रतिपदप्रह्वीभवदास्यसरसिजगळिते
विफलीकृतधवळसिचयहारपटीरालेपासितहसितद्युतिपूरे विसवलयधिये-
वोपयातौ अधर[9]द्युतिजालबालातपयोगादविरतघटितौ चक्रवाकाविव
चारुतरवक्त्रवारिरुहस्वैरावलोककौतुकादिव भृशतरोद्गतिभाजौ सुवृत्ता-
वप्यौद्धत्यातिभारपीडितकृशतरो[10]दरदेशावुरोजकलशावतिकृच्छ्रादेवा-

१. ' भूषाविलुलित ' ग. २. ' तविचित्र ' ग.

३ ' केळीहसित ' ख. ४. ' प्यविरहित ' ख. ग.

५. ' दुद्गत्याव' ग. ङ. ६. ' बहुळ ' ग.

७ ' सेव दोषा विशदकररुहविटपाया ' क. च.

८. ' धाराभिधविलसता कलितकरतलच्छदरक्त ' ग. घ.

९. ' द्युतिबाळातप ' च. १०. ' दरावुरोज ' ग.

बिभ्रती, स्वतो दुर्बलतया बलिभिरुपरुद्धतया चातिदयाविषयोदरदेशा, पादापदेशपाथोजग्रहप्रसारितकरिवरकराकारस्थापितिस्थवीयसोऽप्यूरुयुगलस्य दुरुद्वहगौरवया परिहितवल्कलपरिपाटलद्युतियोगादशेषयुवलोकचित्तरागोपश्लिष्टयेव रक्तोत्पलपलाशपूरस्थगितविशालसैकतदेशदेशीयया असदृशतादृशवासोव्यासक्तयापि सर्वप्रकारहृद्यतथाकारस्य पराघ्यर्कौशेयपरिवीतयेव विराजितया कटितटवीथ्या सर्गावसरे सरोजवसतेरपि दत्तचित्तविक्षोभा, दुश्चरदेशसंचारक्लेशप्रयोक्त्रे विधात्रे रुष्टयेवातिरक्तया तत्रत्यतरुवरप्रत्यग्रपतितबालकिसलयेभ्यो दुरवबोधविशेषया अटवीदेशदुर्लभेऽपि लाक्षारसे स्वरुचिभिरेव विरचिततदालेपकृत्यया पादपयोजयुगल्या कृतोटजाजिरप्रचारसाहसा, चतुर्दशस्वपि विष्टपेष्वदृष्टश्रुततत्तादृशरूपातिशया, सुरभिकाल इव विकसद्रसालसाक्षी, तपत्विभूतिरिव पाटलाभाधरा, प्रावृडिव सरसपयोधरोद्गतिः, शरदिव दर्शितसप्तच्छदगतिः, प्रालेयवेलेव स्वच्छतुषारद्युतिप्रभास्या, शिशिरश्रीरिव तपस्याहितस्थितिः, वाग्देवतेव कलधौतगौराभा वल्लकीकलस्वरसरसा च, श्रीरिव करविधूतसरोरुहा असितद्युतिकेशवासिता च, गिरिसुतेव गृहीतसतीचरिता गिरीशलालितकुचा च, पदकलिततुलाकोटिरपि तुलारहितगात्री, उदरदर्शितासद्भावापि प्रकाशितसद्वृत्ता, भुजगवलय-

---

१. ' दुर्बलतरतया ' ग. २. ' करिकराका ' घ.
३. ' स्थापयति ' ख. ४. ' सैकतैकदेशदेशीय ' घ.
५. ' असदृशवासो ' ङ. ६. ' शसञ्चार ' घ.
७. ' तत्र तरु ' क. ङ. च. ८. ' पद ' ख. ग. घ.
९. ' दृशचारुतरातिशया ' ख. ग. घ.
१०. ' सुरभिवेलेव ' च. ११. ' तसितच्छद ' ख. ग. घ.
१२. ' करविधुत ' ग, ' करधुत ' घ.

भूषितापि क्रूरसत्वभीरुतरा, गळद्युति[1]विलसितापि विगलत्प्रभापूरा, अधरोल्लसितापि धरातलैक[2]विभूषा, ललितबालाभिख्यापि उपारूढयुवतिभावा, चक्षुः[3]फलपक्तिरिव विश्वस्य, विश्वविक्षोभासिद्धविद्येव पुष्पसायकस्य, अधिदेवतेवाद्यरसस्य, दृष्टिगोचरगतेव तृतीयपुरुषार्थसारकला, प्राज्यतरप्राच्यसुकृतपरिपाकसुलभा सीतेति कापि कातराक्षी वीक्षिता ॥

अनुनासिकरहितानि
  व्यतनोदेतानि [4]पद्यगद्यानि ।
नारायणाभिधानो
  द्विजपोतो रविनटेश्वरादेशात् ॥ ७ ॥

---

१. 'विलासितापि' च. २. 'कभूषा' च.

३. 'फलपरिपक्तिरिव' ख. ग. घ. ४. 'गद्यपद्यानि' घ.